# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2024)

# विषय : संस्कृतम्

**कक्षा - द्वादशी** **कोड न. - 526**

**SET : A**

रोल नं० | | | | | | | | | | |

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**

I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 18 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

## खण्डः 'क'

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

नदी पर्वतेभ्यः निर्गत्य क्षेत्रेषु आगच्छति । प्रपातः तस्याः प्रथमावस्था अस्ति । शनैः शनैः सा सागरं प्रति गच्छति । तस्याः बालुकायुक्ततटेषु हरिताः तरवः भवन्ति । तेषां वृक्षाणामुपरि काकाः चटकाः शुकाः कोकिलाश्च वसन्ति। पक्षिणां कलरवैः बालकानां क्रीडाभिः स्त्रीणां वार्तालापैश्च तस्याः तटाः गुञ्जायमानाः भवन्ति परं केचन जनाः अत्रागत्य मनोरञ्जनं कुर्वन्ति, खादन्ति, भोजनस्य अवशिष्टं च तस्याः जले एव पातयन्ति । एवं तस्याः जलं दूषितं भवति । दूषितं जलं स्वास्थ्याय अहितकरम् अस्ति । अतः जलं दूषितं न कर्तव्यं यतः प्राणिनां जीवनम् अस्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) जलं केषां जीवनम् ?
(ख) नद्याः प्रथमावस्था का ?
(ग) नदी केभ्यः निर्गत्य क्षेत्रेषु आगच्छति ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) कीदृशं जलं स्वास्थ्याय अहितकरम् ?

(ख) नद्याः तटाः कथं गुञ्जायमानाः भवन्ति ?

(ग) नदी पर्वतेभ्यः निर्गत्य कुत्र आगच्छति ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) अस्मिन् गद्यांशे 'निर्मलम्' इत्यस्य शब्दस्य कृते किं विलोमपदं प्रयुक्तम्?
(क) मनोरञ्जनम् (ख) अवशिष्टम्
(ग) दूषितम् (घ) भोजनम्

(ii) 'प्राणिनाम्' इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) षष्ठी (घ) सप्तमी

(iii) 'जलम्' इत्यस्य विशेषणपदं किम्?
(क) दूषितम् (ख) अवशिष्टम्
(ग) सागरम् (घ) अहितकरम्

(iv) 'अतः जलं दूषितं न कर्तव्यं यतः प्राणिनां जीवनम् अस्ति।' इत्यस्मिन् वाक्ये 'अस्ति' क्रियापदस्य कर्ता कः?
(क) कर्तव्यम् (ख) दूषितम्
(ग) प्राणिनाम् (घ) जलम्

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य षड्वाक्यानि संस्कृतभाषया लिखत - 6

(क) प्रातः कालीन भ्रमणम्

(ख) सत्सङ्गतिः

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) परोपकारः

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) इन्द्रवज्रा-छन्दसः लक्षणं किम्?

(ख) अनुष्टुप्-छन्दसः उदाहरणं किम्?

(ग) मालिनीछन्दसि कति वर्णाः भवन्ति?

(घ) जतौ तु ............... मुदीरितं जरौ । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) उपमा-अलङ्कारस्य लक्षणं किम्?

(ख) अनुप्रासस्य अलङ्कारस्य उदाहरणं किम्?

(ग) यमकस्य अलङ्कारस्य लक्षणं किम्?

(घ) तद्रूपकमभेदो य ......................। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः 'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

स मृण्मये वीतहिरणमयत्वात्

पात्रे निधायार्घ्यमनर्घशीलः।

श्रुतप्रकाशं यशसा प्रकाशः

प्रत्युज्जगामातिथिमातिथेयः।।

**अथवा**

नियतं कुरु कर्म तवं कर्म ज्यायो ह्यकर्मणः।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां महात्म्यम्-एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्च तुरङ्गबलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते।

**अथवा**

श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरणेन आगत्य ओडिशासर्वकारस्य अधीने प्रायः वर्षत्रयेभ्यः कार्यं करोति। तथाप्यस्मिन् वर्षत्रयात्मके कालखण्डे एकवारमपि स्वराज्यं केरलं प्रति गमनाय इच्छां न प्रकटितवान्।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) कार्यं वा साधयेयम्, देहं वा पातयेयम्।

(ख) उपभोक्तृणामपि अभियोगो नास्ति विभागस्य विपक्षे।

(ग) अहो असारोऽयं संसारः।

(घ) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।

**अन्वयः :-**

1) ............... यत् किं च जगत्, ईदं सर्वं ईशा 2) ....................... तेन त्यक्तेन 3) ...................

मा 4) ...................... धनं कस्य स्वित्।

**मञ्जूषा**

| |
|---|
| वास्यम्, भुञ्जीथाः, जगत्याम्, गृधः |

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

**प्रश्नाः -**

(क) इतरः जनः कथम् आचरति ?

(ख) लोकः कम् अनुवर्तते ?

(ग) 'श्रेष्ठः' इति पदं कस्मिन् वचने अस्ति?

(घ) 'तदेव' इत्यस्य पदस्य सन्धिच्छेदं कुरुत।

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -
(केवलं प्रश्नत्रयम्) 3×1=3

अहो असारोऽयं संसारः, कदा कस्य किं भविष्यतीति न ज्ञायते। यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति।

(क) अयं संसारः कीदृशः ?

(ख) दानभोगैर्विना किं सफलं न भवति?

(ग) 'भविष्यतीति' इत्यस्मिन् पदे कः सन्धिः ?

(घ) 'भवति' इत्यस्मिन् पदे कः लकारः ?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)

4×1=4

(क) अविद्योपासकाः अन्धन्तमः प्रविशन्ति। (के / काः)

(ख) वरतन्तुः मन्त्रकृताम् अग्रणीः आसीत्। (काम् / केषाम्)

(ग) उत्पथैः मम मनः पारिप्लवं धावति। (कः / कस्य)

(घ) लक्ष्मीः शूरं कण्टकमिव परिहरति। (कम् / केषु)

(ङ) राजा ब्राह्मणाय चत्वारि रत्नानि ददौ। (कस्य / कस्मै)

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) ईशावास्योपनिषदि कति मन्त्राः सन्ति?

(ख) 'शुकनासोपदेशः' अस्मिन् पाठे नायकस्य नाम किम्?

(ग) 'सिंहासनद्वात्रिंशिका' अस्य ग्रन्थस्य समयः कस्य राज्ञः अनन्तरमेव मन्यते?

(घ) 'बालकौतुकम्' अयं पाठः कस्मात् ग्रन्थात् सङ्कलितः?

(ङ) 'सिंहासनद्वात्रिंशिका' अस्मिन् पाठे वर्णितसिंहासने कति पुत्तलिकाः आसन्?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) करुणरसप्रियः महाकविः कः?

(ख) शिवराजविजयस्य रचयिता कः?

(ग) कालिदासस्य प्रसिद्धं महाकाव्यं किम्?

(घ) महाभारतस्य रचयिता कः?

(ङ) महाकविभवभूतिना कानि नाटकानि रचितानि?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) अयादिसन्धेः अथवा गुणसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) कर्मधारयसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) कर्ताकारकस्य अथवा करणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

# खण्डः – ‘ङ’

# पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

1) 'तांस्ते' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) ताम् + ते　　ख) तांस् + ते

ग) तान् + ते　　घ) तां + स्ते

2) 'भूपतिर्भासुर' इत्यस्मिन् शब्दे कः सन्धिः?

क) गुणसन्धिः　　ख) व्यञ्जनसन्धिः

ग) विसर्गसन्धिः　　घ) वृद्धिसन्धिः

3) 'तदेहि' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) तत् + एहि　　ख) तत् + इहि

ग) तद् + एहि　　घ) तद् + इहि

4) 'प्रविश्य' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) ष्यञ्　　ख) ल्यप्

ग) क्त्वा　　घ) तव्यत्

5) 'ग्रस्यमानः' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) मान्　　ख) क्तवतु

ग) शतृ　　घ) शानच्

6) 'त्यज् + क्त्वा' एतयोः संयोगे किं रूपम्?

क) त्यज्त्वा　　ख) त्यक्त्वा

ग) त्यक्ता　　घ) त्याज्या

7) 'मेघमाला' इत्यस्मिन् शब्दे कः समासः?

क) चतुर्थीतत्पुरुषः　　ख) पञ्चमीतत्पुरुषः

ग) अव्ययीभावसमासः　　घ) षष्ठीतत्पुरुषः

8) 'पुष्पाञ्जलिम्' इत्यस्य शब्दस्य कः विग्रहः?

क) पुष्पाणाम् अञ्जलिम्  ख) पुष्पम् अञ्जलिम्

ग) पुष्पैः अञ्जलिम्  घ) पुष्पेषु अञ्जलिम्

9) 'वाक् एव भूषणम्' अत्र समस्तपदम् किम्?

क) वाग्भूषणम्  ख) वाचिभूषणम्

ग) वाचभूषणम्  घ) वाक्भूषणम्

10) 'जनस्य' इत्यस्मिन् शब्दे का विभक्तिः?

क) तृतीया  ख) चतुर्थी

ग) पञ्चमी  घ) षष्ठी

11) 'जगाद' इत्यस्मिन् शब्दे कः लकारः?

क) लट् लकारः  ख) लिट् लकारः

ग) लोट् लकारः  घ) लुङ् लकारः

12) 'विद्या' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) ईश्वरकृत विद्या  ख) ज्ञानम्

ग) अज्ञानम्  घ) कर्मः

13) 'तमसा' इत्यस्य शब्दस्य विलोमपदं किम्?

क) प्रकाशेन  ख) अन्धकारेण

ग) नद्या  घ) तिमिरेण

14) 'समस्तम्' इत्यस्य शब्दस्य विलोमपदं किम्?

क) सकलम्  ख) सम्पूर्णम्

ग) असमस्तम्  घ) श्रेष्ठम्

15) 'दारुणः' इत्यस्य शब्दस्य विशेष्यपदं किम्?

क) दिवसः  ख) लक्ष्मीमदः

ग) यौवनप्रभः  घ) लक्ष्मीपदः

16) 'संसारः' इत्यस्य शब्दस्य विशेषणपदं किम्?

क) सकलः  ख) सकलगुणनिवासः

ग) असारः  घ) अशारः